श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीरामचन्द्र कृतम्

# ॥ श्रीआञ्जनेय कवचम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीआञ्जनेय कवचम् ॥

अस्य श्रीहनूमत्कवच स्तोत्रमहामन्त्रस्य। श्रीरामचन्द्र ऋषिः। गायत्री छन्दः। श्रीहनूमान् परमात्मा देवता। मारुतात्मज इति बीजम्। अञ्जनासूनुरिति शक्तिः। श्रीरामदूत इति कीलकम्। मम मानसाभीष्टसिद्ध्यर्थे जपे विनियोगः॥

श्रीरामचन्द्र उवाच।
हनूमान् पूर्वतः पातु दक्षिणे पवनात्मजः।
प्रतीच्यां पातु रक्षोघ्नः सौम्यां सागरतारणः॥ १॥

ऊर्ध्वं मे केसरी पातु विष्णुभक्तस्तु मे ह्यधः।
लङ्काविदाहकः पातु सर्वापद्भ्यो निरन्तरम्॥ २॥

सुग्रीवसचिवः पातु मस्तके वायुनन्दनः।
फालं पातु महावीरः भ्रुवोर्मध्ये निरन्तरम्॥ ३॥

नेत्रे छायापहारी च पातु मां प्लवगेश्वरः।
कपोलौ कर्णमूले तु पातु मे रामकिङ्करः॥ ४॥

नासायामञ्जनासूनुः पातु वक्त्रं हरीश्वरः।
पातु कण्ठं च दैत्यारिः स्कन्धौ पातु सुरार्चितः॥ ५॥

भुजौ पातु महातेजाः करौ तु चरणायुधः।
नखान् नखायुधः पातु कुक्षौ पातु कपीश्वरः॥ ६॥

वक्षो मुद्रापहारी च पातु पार्श्वे महाभुजः।
सीताशोकप्रहर्ता च स्तनौ पातु निरन्तरम्॥ ७॥

लङ्काभयङ्करः पातु पृष्ठदेशे निरन्तरम्।
नाभिं श्रीरामदासो मे कटिं पातु समीरजः॥ ८॥

गुह्यं पातु महाप्राज्ञः सक्थिनी च शिवप्रियः।
ऊरू च जानुनी पातु लङ्काप्रासादभञ्जनः॥ ९ ॥

जङ्घे पातु कपिश्रेष्ठः गुल्फं पातु महाबलः।
अचलोद्धारकः पातु पादौ भास्करसन्निभः॥ १० ॥

अङ्गान्यमितसत्वाढ्यः पातु पादाङ्गुलीस्सदा।
सर्वाङ्गानि महाशूरः पातु रोमाणि चात्मवान्॥ ११ ॥

हनूमत्कवचं यस्तु पठेत् विद्वान् विचक्षणः।
स एव पुरुषश्रेष्ठः भुक्तिं मुक्तिं च विन्दति॥ १२ ॥

त्रिकालं एककालं वा पठेत् मासत्रयं नरः।
सर्वान् रिपून् क्षणात् जित्वा स पुमान् श्रियं आप्नुयात्॥ १३ ॥

अर्धरात्रौ जले स्थित्वा सप्तवारं पठेत् यदि।
क्षयापस्मारकुष्ठादि तापत्रयनिवारणम्॥ १४ ॥

अश्वत्थमूलेऽर्कवारे स्थित्वा पठति यः पुमान्।
अचलां श्रियमाप्नोति सङ्ग्रामे विजयी भवेत्॥ १५ ॥

सर्वरोगाः क्षयं यान्ति सर्वसिद्धिप्रदायकम्।
यः करे धारयेन्नित्यं रामरक्षासमन्वितम्॥ १६ ॥

रामरक्षां पठेद्यस्तु हनूमत्कवचं विना।
अरण्ये रुदितं तेन स्तोत्रपाठञ्च निष्फलम्॥ १७ ॥

सर्वदुःखभयं नास्ति सर्वत्र विजयी भवेत्।
अहोरात्रं पठेद्यस्तु शुचिः प्रयतमानसः॥ १८ ॥

मुच्यते नात्र सन्देहः कारागृहगतो नरः।
पापोपपातकान्मर्त्यः मुच्यते नात्र संशयः॥ १९ ॥

यो वारान्निधिमल्पपल्वलमिवोल्लङ्घ्य प्रतापान्वितः
वैदेहीहीघनशोकतापहरणो वैकुण्ठभक्तिप्रियः।

अक्षघ्नो जितराक्षसेश्वरमहादर्पापहारी रणे
सोऽयं वानरपुङ्गवोऽवतु सदा त्वस्मान् समीरात्मजः॥ २०॥

॥ इति श्रीआञ्जनेय कवचं संपूर्णम्॥